Sch. G. न, स, म, र, स, ल, ग ( 6. 4. 7 )
Ex. सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यंधः क्षिप्तां धुनोत्यहिशंकया ॥
S. 7. 24.

*Metres with 18 Syllables in a quarter.*

( धृति )

( 1 ) कुसुमितलतावेल्लिता.

Def. स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ।
Sch. G. म, त, न, य, य, य ( 5. 6. 7 )
Ex. क्रीडत्कालिंदीललितलहरीवारिभिर्दाक्षिणात्यै-
र्वातैः खेलद्भिः कुसुमितलतावेल्लिता मंदमंदम् ।
भृंगालीगीतैः किसलयकरोल्लासितैर्लास्यलक्ष्मीं
तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥

( 2 ) चित्रलेखा.

Def. मंदाक्रांता नयरलघुयुता कीर्तिता चित्रलेखा ।
Sch. G. म, भ, न, य, य, य ( 4. 7. 7. )
Ex. शंकेऽमुष्मिन् जगति मृगदृशां साररूपं यदासी-
दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि ।
नैतादृक् चेत् कथमुदधिसुतामंतरेणाच्युतस्य
प्रीतं तस्या नयनयुगमभूच्चित्रलेखाद्भुतायाम् ॥

( 3 ) नंदन

Def. नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नंदनम् ।
Sch. G. न, ज, भ, ज, र, र ( 11. 7 )
Ex. तरणिसुतातरंगपवनैः सलीलमांदोलितं
मधुरिपुपादपंकजरजःसुपूतपृथ्वीतलम् ।
मुरहरचित्रचेष्टितकलाकलापसंस्मारकं
क्षितितलनंदनं व्रज सखे सुखाय वृंदावनम् ॥

( 4 ) नाराच

Def. इह ननरचतुष्कसृष्टं तु नाराचमाचक्षते ।
Sch. G. न, न, र, र, र, र ( 8. 5, 5 )
Ex. रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि बिभीषणे संक्रमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥
R. 12. 104

( 5 ) शार्दूलललित

Def. मः सो जः सतसा दिनेशऋतुभिः शार्दूलललितम् ।
Sch. G. म, स, ज, स, त, स ( 12. 6. )
Ex. कृत्वा कंसमृगे पराक्रमविधिं शार्दूलललितं
यश्चक्रे क्षितिभारकारिषु दरं चैद्यप्रभृतिषु ।
संतोषं परमं तु देवनिवहे त्रैलोक्यशरणं
श्रेयो नः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥

*Metres with 19 Syllables in a quarter.*

( अतिधृति )

( 1 ) मेघविस्फूर्जिता

Def. रसर्त्वश्वैर्य्मौ न्सौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ।
Sch .G. य, म, न, स, र, र, ग, ( 6. 6. 7 )
Ex. कदंबामोदाढ्या विपिनपवनाः केकिनः कांतकेकाः
विनिद्राः कंदल्यो दिशि दिशि मुदा दर्दुरा दृप्तनादाः ।
निशा नृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चेत्
प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात्किमन्यत् ॥

( 2 ) शार्दूलविक्रीडित

Def. सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ।
Sch. G. म, स, ज, स, त, त, ग ( 12. 7 )
Ex. वेदांतेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अंतर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः
V. 1. 1.

( 3 ) सुमधुरा

Def. म्रौ भ्नौ मो नो गुरुश्चेद् हयऋतुरसैरुक्ता सुमधुरा ।
Sch. G. म, र, भ, न, म, न, ग ( 7. 6. 6 )
Ex. वेदार्थान् प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता ।
दीप्ताग्नौ पाणिमंतः क्षिपसि स च ते [illegible] भवति नो
चारित्र्याचारुदत्तं चलयसि न ते देहं हरति भूः ॥
Mk. 9. 21.

( 4 ) सुरसा

Def. म्रौ भ्नौ यो नो गुरुश्चेत् स्वरमुनिकरणैराह सुरसाम् ।
Sch. G. म, र, भ, न, य, न, ग ( 7. 7. 5 )
Ex. कामक्रीडासतृष्णो मधुसमयसमारंभरभसात्
कालिंदीकूलकुंजे विहरणकुतुकाकृष्टहृदयः ।
गोविंदो बल्लवीनामधररससुधां प्राप्य सुरसां
शंके पीयूषपानैः प्रचयकृतसुखं व्यस्मरदसौ ॥

*Metres with 20 Syllables in a quarter.*

( कृति )

( 1 ) गीतिका

Def. सजसा भरौ सलगा यदा कथिता तदा खलु गीतिका
Sch. G. स, ज, स, भ, र, स, ल, ग ( 5. 7. 8 )
Ex. करतालचंचलकंकणस्वनमिश्रणेन मनोरमा
रमणीयवेणुनिनादरंगिमसंगमेन सुखावहा ।
बहलानुरागनिवासरासससमुद्भवा तव रागिणं
विदधौ हरिं खलु वल्लवीजनचारुचामरगीतिका ॥

( 2 ) सुवदना

Def. ज्ञेया सप्ताश्वषड्भिर्मरभनययुता म्लौ गः सुवदना
Sch. G. म, र, भ, न, य, भ, ल, ग ( 7. 7. 6 )
Ex. उत्तुंगास्तुंगकूलं स्रुतमदसलिलाः प्रस्यंदि सलिलं
श्यामाः श्यामोपकंठद्रुममतिमुखराः कल्लोलमुखरम् ।
स्रोतःखातावसीदत्तटमुरुदशनैरुत्सादिततटाः
शोणं सिंदूरशोणा मम गजपतयः पास्यंति शतशः ॥
Mu. 4. 16.

*Metres with 21 Syllables in a quarter.*

( प्रकृति )

( 1 ) पंचकावली

( Also called सरसी, धृतश्री )

Def. नजभजजा जरौ नरपते कथिता भुवि पंचकावली ।
Sch. G. न, ज, भ, ज, ज, ज, र ( 7. 7. 7 )